तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुडं हरिः ।
जगाम पुष्पभद्रां स उत्तरस्यां दिशि स्थिताम् ॥
पुष्पभद्रानदीतीरे ददर्श काननस्थितम् ।
गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम् ॥
शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा ।
स्थापयामास गरुडे रुधिराक्तं मनोहरम् ॥
आगत्य पार्व्वतीस्थानं बालं कृत्वा स्ववक्षसि ।
रुचिरं तच्छिरः कृत्वा योजयामास बालके ॥
ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन लीलया ।
जीवनं जीवयामास हूंकारोच्चारणेन च ॥”
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
अस्य ध्यानम् ।
“खर्व्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥”
इति पुराणम् ॥ * ॥
ध्यानान्तरं यथा,—
“सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामम् ।
बालेन्दुद्योतमौलिं करिपतिवदनं दानपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम् ॥”
इति तन्त्रसारः ॥
(तस्य नमस्कारमन्त्रो यथा,—
“देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥”
इति पूजापद्धतिः ॥)
एकपञ्चाशद्गणेशाः । यथा,—
“विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ ।
विघ्नकृत् विघ्नहर्त्ता च गणैकद्विरदन्तकाः ॥
गजवक्त्रनिरञ्जनौ कपर्द्दी दीर्घजिह्वकः ।
शङ्कुकर्णश्च वृषभध्वजश्च गणनायकः ॥
गजेन्द्रः शूर्पकर्णश्च स्यात्त्रिलोचनसंज्ञकः ।
लम्बोदरमहानन्दौ चतुर्म्मूर्त्तिसदाशिवौ ॥
आमोददुर्म्मुखौ चैव सुमुखश्च प्रमोदकः ।
एकपादो द्विजिह्वश्च सुरवीरः सषण्मुखः ॥
वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः ।
सेनानीर्ग्रामणीर्म्मत्तो विमत्तो मत्तवाहनः ॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः ।
भक्ष्यप्रियो गणेशश्च मेघनादकसंज्ञकः ॥
व्यापी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे ।
तरुणारुणसङ्काशा गजवक्त्रास्त्रिलोचनाः ॥
पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः ॥” * ॥
तेषामेकपञ्चाशच्छक्तयश्च यथा,—
“ह्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती ।
स्वाहामेधाकान्तिकामिन्यो मोहिन्यपि वैनटी ॥
पार्व्वती ज्वलिनी नन्दा सुयशाः कामरूपिणी ।
उमा तेजोवती सत्या विघ्नेशानी सुरूपिणी ॥
कामदा मदजिह्वा च भूतिः स्याद्भौतिका सिता ।
रमा च महिषी प्रोक्ता ध्वजिनी च विकर्णपा ॥
भ्रुकुटिः स्यात्तथा लज्जा दीर्घघोणा धनुर्द्धरा ।
यामिनी रात्रिसंज्ञा च कामान्धा च शशिप्रभा ॥
लोलाक्षी चञ्चला दीप्तिः सुभगा दुर्भगा शिवा ।
भर्गा च भगिनी चैव भोगिनी सुभगा मता ॥
कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः ।
सर्व्वालङ्करणोद्दीप्ताः प्रियाङ्कस्थाः सुशोभनाः ॥
रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरारुणाः ॥”
इति शारदातिलकटीकायां राघवभट्टः ॥

गणेशकुसुमं, क्ली, (गणेश इव कुसुमम् । रक्तवर्णसादृश्यात्तथात्वम् ।) रक्तकरवीरः । इति राजनिर्घण्टः ॥

गणेशभूषणं, क्ली, (गणेशस्य भूषणमिव ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

गणोत्साहः, पुं, (गणाय गणार्थं वा यूथीकरणायेत्यर्थः उत्साहोऽस्य । यद्वा गणान् यूथान् उत्साहयतीति । उत् + साहि + अण् ।) गण्डकः । इति त्रिकाण्डशेषः ॥ गण्डार इति भाषा ॥

गण्डः, पुं, (गडि वदनैकदेशे + अच् । यद्वा गम गतौ + “अमन्ताड्डः ।” उणां । १।११३। इति डः ।) हस्तिकपोलः । (यथा, पञ्चतन्त्रे ।१।३५६।
“प्रमाणाभ्यधिकस्यापि गण्डश्याममदच्युतेः ।
पदं मूर्द्ध्नि समाधत्ते केशरी मत्तदन्तिनः ॥”)
तत्पर्य्यायः । कटः २ । इत्यमरः ।२।८।३७ ॥ करटः ३ । इति तट्टीका ॥ कटकः ४ हस्तिगण्डकः ५ । इति शब्दरत्नावली ॥ कपोलः । इत्यमरः ।२।६।९० ॥ गाल इति भाषा ॥ (यथा, कुमारे ।७।८२।
“तदीषदार्द्रारुणगण्डलेखं
उच्छ्वासिकालाञ्जनरागमक्ष्णोः ॥”)
खड्गी । वीवधङ्गम् । पिटकः । चिह्नम् । वीरः । हयभूषणम् । बुद्बुदः । इति मेदिनी ॥ स्फोटकः । ग्रन्थिः । इत्यमरटीकायां रमानाथः ॥ विष्कुम्भादिसप्तविंशतियोगान्तर्गतदशमयोगः । (यथा, ज्योतिषवचने ।
“गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥”)
तत्र जातफलम् ।
“स्वकार्य्यकर्त्ता परकार्य्यहर्त्ता
गण्डोद्भवः स्यादतिगण्डवाक्यः ।
अत्यन्तधूर्त्तः पुरुषः कुरूपः
सुहृज्जनानामतितापदाता ॥”
इति कोष्ठीप्रदीपः ॥ * ॥
दोषजनकोऽश्विन्यादिनक्षत्राणां भागविशेषः । यथा,—
“अश्विनीमघमूलानां तिस्रो गण्डाद्यनाड़िकाः ।
अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः ॥
मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः ।
सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः ॥” * ॥
तत्र जातस्य दोषो यथा,—
“सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः ।
आत्मानं मातरं तातं विनिहन्ति यथाक्रमम् ॥”
तस्य शान्तिर्यथा,—
“सर्व्वेषां गण्डजातानां परित्यागो विधीयते ।
तातेनादर्शनं वापि यावत् षाण्मासिको भवेत् ॥
कुङ्कुमं चन्दनं कुष्ठं गोरोचनमथापि वा ।
घृतैरेवान्वितं कृत्वा चतुर्भिः कलसैर्ब्बुधः ॥
सहस्राक्षेण मन्त्रेण बालकं स्नापयेत्ततः ।
पितृयुक्तं दिवाजातं मातृयुक्तञ्च रात्रिजम् ॥
स्नापयेत् पितृमातृभ्यां सन्ध्ययोरुभयोरपि ।
कांस्यपात्रं घृतैः पूर्णं गण्डदोषोपशान्तये ॥
दद्याद्धेनुं हिरण्यञ्च ग्रहांश्चापि प्रपूजयेत् ।
मूलायाः प्रथमे पादे पितुर्व्वपुर्व्विनश्यति ॥
द्वितीये नियतां पीड़ां मातुः कुर्य्यात् पितुस्तथा ।
तृतीये धननाशाय चतुर्थे सर्व्वसम्पदः ॥
व्यत्ययेन फलं ज्ञेयमश्लेषास्वपि पूर्व्ववत् ।
वल्मीकमृत्तिकां नद्यास्तूभयतटमृत्तिकाम् ॥
गोविषाणमृदञ्चापि दन्तिमृदञ्च निःक्षिपेत् ।
तीर्थाम्भःपञ्चगव्येन स्नानं मातुः पितुः शिशोः ॥
दिवा जाता तु या कन्या निशि जातस्तु यः पुमान् ।
नोभयोर्गण्डदोषः स्यात् नाचलो हन्ति पर्व्वतम् ॥”
इति ज्योतिषतत्त्वम् ॥

गण्डकः, पुं, (गण्ड + स्वार्थे कन् ।) खड्गी । इत्यमरः ।१।१०।१७॥ गण्डार इति भाषा ॥ खड्गः । संख्याप्रभेदः । गण्डा इति भाषा । विद्याविशेषः । अवच्छेदः । अन्तरायः । इति मेदिनी । के ८२ ॥ (देशविशेषः । यथा, महाभारते ।२।२९।४।
“ततः स गण्डकान् शूरो विदेहान् भरतर्षभः ॥”
भूषणम् । यथा, कादम्बर्य्याम् । “व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा च ॥” ग्रन्थिः । यथा, तत्रैव । “गोरोचनालिखितभूर्ज्जपत्त्रगर्भान् मन्त्रगण्डकान् ॥” स्फोटकरोगविशेषः । यथा, तत्रैव ।
“अनेकवेत्राघातनिर्म्मितबहुगात्रगण्डकम् ॥”)

गण्डकारी, स्त्री, (गण्डं भग्नास्थिग्रन्थिमित्यर्थः करोति संयोजयतीति ।) खदिरीक्षुपः । इति शब्दचन्द्रिका ॥ वराहक्रान्ता । इति रत्नमाला ॥

गण्डकाली, स्त्री, (गण्ड + कृ + “कर्म्मण्यण् ।” ३।२।१। इत्यण् ततो ङीप् । रस्य लत्वं यद्वा गण्डेषु ग्रन्थिषु काली यस्याः ।) खदिरीक्षुपः । इत्यमरः ।२।४।१४१ ॥
(“गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित् ॥”
इति वैद्यकरत्नमालायाम् ॥)

गण्डकी, स्त्री, (गण्डक + स्त्रियां जातौ ङीष् ।) स्वनामख्याता नदी । इति मेदिनी ।८२॥ यथा, स्मृतिः ।
“गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम् ।
पाषाणं तद्भवं यत्तत् शालग्राममिति स्मृतम् ॥”
तत्र शालग्रामोत्पत्तिकारणं यथा,—
“गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधेः ।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
गण्डकि ! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे ! ॥
अनवच्छिन्नया भक्त्या वरं वरय सुव्रते ! ।
किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि ! ॥